# कञ्जदळायताक्षि

## रागम्ः कमलामनोहरि     ताळम्ः आदि

श्री मुत्तुस्वामि दीक्षित विरचिता

**पल्लवि**

कञ्जदळायताक्षि कामाक्षि
कमलामनोहरि त्रिपुरसुन्दरि

**अनुपल्लवि**

**मध्यमकाल सहित्यम्**

कुञ्जरगमने मणिमण्डितमञ्जुळचरणे
मामव शिवपञ्जरशुकि पङ्कजमुखि
गुरुगुहरञ्जनि दुरितभञ्जनि निरञ्जनि

**चरणम्**

राकाशशिवदने सुरदने रक्षितमदने रत्नसदने
श्रीकाञ्चनवसने सुरसने शृङ्गाराश्रयमन्दहसने

**मध्यमकाल सहित्यम्**

एकनेकाक्षरि भुवनेश्वरि एकानन्दामृतझरि भास्वरि
एकाग्रमनोलयकरि श्रीकरि एकाम्रेशगृहेश्वरि शङ्करि

◇ ◇ ◇ ◇ ◇ ◇ ◇ ◇ ◇ ◇